# संस्कृत-वार्ता:
# 04/10/2023
# सायं : 06:20

<u>मुख्यवार्ता</u>

- प्रधानमन्त्री श्वः राजस्थान-मध्यप्रदेशयोः यात्रां विधाय विविध-परियोजनानाम् आधारशिलां संस्थापयिष्यति ।
- सिक्किम-राज्यस्य मङ्गन-मण्डलस्य ल्होनाक्-सरोवरे मेघस्य विस्फोटानन्तरं तीस्ता-नद्यां जाते जलाप्लवने पेक्योङ्-मण्डले सैन्य-प्रतिष्ठानम् जलप्रलयेन आहतानन्तरं त्रोविंशति-सैनिकाः लुप्ताः सन्ति ।
- बिहारस्य उत्तर-पश्चिम-दक्षिण-पूर्व-क्षेत्रयोः भीषण-वृष्टिपातः अधुनापि प्रचलति ।
- चीनस्य हांगचोओ इत्यत्र नवदश-तमे एशियाई-क्रीडास्पर्धासु भारतेन अद्य यावत् अशीति-पदकानि विजितानि ।

<u>प्रधानमन्त्री-राज्यद्वययात्रा</u>

प्रधानमन्त्री श्वः राजस्थाने स्वास्थ्या-धारभूत-संरचनां सुदृढं कर्तुं महत्वपूर्ण-परियोजनानाम् आधारशिलां संस्थापयिष्यति । एतासु परियोजनासु जोधपुरस्य अखिल-भारतीय-आयुर्विज्ञान-संस्थाने पञ्चाशदुत्तर-त्रिशतं शय्यानां ट्रॉमा-सेंटर इति आघात-केन्द्रं , सम्पूर्ण-राज्ये प्रधानमन्त्री-आयुष्मान-भारत-स्वास्थ्याधारभूत-संरचनाभियानस्य अभियानान्तर्गतं सप्त निरीक्षण-केन्द्रैः युताः परियोजनाः च सम्मिलिताः सन्ति । श्रीमोदी जोधपुर-विमान-स्थात्रे अत्याधुनिकस्य नूतन-टर्मिनल-भवनस्य शिलान्यासं करिष्यति । एतत् भवनं न्यूनातिन्यूनं चतुर्विंशति-सहस्र-वर्ग-मीटर-मिते क्षेत्रे अशात्यधिक-चतुश्शत-कोटि-रूप्यकाणां व्ययेन निर्मास्यते । एतस्मात् नवीन-टर्मिनल-भवनात् व्यस्त-समयावधौ पञ्चशतोत्तर-द्विसहस्र यात्रिणः यात्रासेवायाः लाभं प्राप्स्यन्ति सहैव अनेन क्षेत्रस्य पर्यटने अपि वृद्धिः भविष्यति ।

प्रधानमन्त्री आईआईटी-जोधपुर-परिसरस्य अपि लोकार्पणं करिष्यति । अस्य नर्माणे पञ्चत्रिंशदधिक-एकशताधिक-एकसहस्र-कोटि-रूप्यकाणां व्ययः सञ्जातः अस्ति । राजस्थानस्य केन्द्रिय-विश्वविद्यालये आधारभूत-संरचना-विकासस्य

अन्तर्गतं उन्नत-प्रयोगशालायाः, कर्मचारी-आवास-क्रीडा-योग-विज्ञानकेन्द्रस्य च उद्घाटनं विधास्यति । श्री-मोदी विश्वविद्यालये केन्द्रिय-पुस्तकालयस्य छात्रावास-भवन चापि शिलान्यासं करिष्यति । प्रधानमन्त्री प्रायः पञ्चसप्तति-अधिक-चतुश्शताधिक-एकसहस्र-कोटि-रूप्यकाणां विभिन्न-मार्ग-परियोजनानां अपि शुभारंभं करिष्यति । अनेन संपर्क-सौविध्यं विवर्ध्य व्यापार-जीविकयोः सर्जने वृद्धिः भविष्यति । राजस्थानस्य यात्रावधौ श्रीमोदी द्वयोः नूतन-रेलयानयोः ध्वजमुत्थाप्य शुभारम्भं करिष्यति । अस्यां यात्रायां जैसलमेर-स्थात्रात् दिल्ली-पर्यन्तं रूनिचा-एक्सप्रेस् मारवाड़-जंक्शन-स्थात्रात् खांबली-घाट-पर्यन्तं धरोहर-रेलयानं सम्मिलिते स्तः । धरोहर-रेलयानेन पर्यटनाय प्रोत्साहनं प्राप्स्यते क्षेत्रे जीविकायाः नवीनावसराः च सर्जिष्यन्ते । एताम् परियोजनाम् अतिरिच्य प्रधानमन्त्री अन्ये द्वे रेलपरियोजने राष्ट्राय समर्पयिष्यति ।एतयोः पञ्चाशदुत्तर-एकशत-किलोमीटर-मितस्य देगाना-'राई-का-बाग'-रेल-विस्तारं , अष्टपञ्चाशत्-किलोमीटर-मितस्य देगाना-कुचामन-सिटी-रेल-विस्तारं इत्यनयोः द्विधाकरण-परियोजने सम्मिलिते स्तः । प्रधानमन्त्री नरेन्द्र-मोदी श्वः मध्य-प्रदेशस्य यात्रां विधास्यति । सः राज्ये षट्-शताधिक-द्वसहस्र-कोटि-रूप्यकाणां परियोजनानाम् उद्घाटनं लोकार्पणं च करिष्यति । एताः परियोजनाः मार्ग ,रेल,वात्येन्धन-पाइपलाइन,आवास ,स्वच्छ-पेयजल-सम्बद्धाः वर्तन्ते। श्रीमोदी इंदौरनगरे लाइट-हाउस-परियोजनायाः उद्घाटनं करिष्यति । अस्याः निर्माणं प्रधानमंत्री-आवास-योजना-शहरी इत्यस्य अंतर्गतं अष्टाविंशति-अधिक-एकशत-कोटि-रूप्यकाणां व्ययेन सञ्जातमस्ति । अस्याः अन्तर्गतं एकसहस्रतः अधिकाः परिवाराः लाभान्विताः भविष्यन्ति ।

प्रधानमंत्री अष्ट-चत्वारिंशत्-अर्बुद-रूप्यकाणां विभिन्न-मार्ग-परियोजनानाम् उद्घाटनं लोकार्पणं च करिष्यति येन मध्यप्रदेशे मार्ग-संरचनायाम् उन्नतिः भविष्यति ।

सिक्किम-जलाप्लवः

सिक्किम-राज्यस्य मङ्गन-मण्डलस्य ल्होनाक्-सरोवरे मेघस्य विस्फोटानन्तरं तीस्ता-नद्यां जलाप्वनं सञ्जातम् । पेक्योङ्-मण्डले सैन्य-प्रतिष्ठानम् जलप्रलयेन आहतानन्तरं त्रोविंशति-सैनिकाः लुप्ताः सन्ति । बारदाङ्गे यानानि अपि प्रवहिताः । मङ्गन्, गङ्टोक् , पेक्योङ् , नामची- मण्डलेषु महती क्षतिः जाता । अनेके सेतवः भवनानि चापि भग्नानि सञ्जातानि । फिदाङ्-दिवचु इत्यत्र अपि गृहाणि क्षतिग्रस्तानि सन्ति ।मङ्न-मण्डले सञ्चारजालम् अपि बाधितम् वर्तते ।साङ्खलाङ्-नगरे जी.आर.ई.एफ् -इत्यस्य द्वौ कार्मिकौ लुप्तौ स्तः । तुङ्गे आरक्षि-स्थानकम् अपि प्रवहितम् अपि च चत्वारः जनाः लुप्ताः सन्ति । राज्यापत् सहयोगी-दलेन गङ्टोक-नगरे पञ्चविंशति जनाः संरक्षिताः । प्रायशः पञ्चशतं यावत् जनाः सहायतास्थलेषु शरणं प्राप्तवन्तः । प्रणामी-मन्दिरे साहाय्योद्धार-शिबिराणां स्थापना कृतास्ति । सिक्किमे तीस्ता-नद्याः बेसिन-क्षेत्रे अकस्मात-जलप्रलयानन्तरं मुख्यमन्त्री प्रेमसिंह-तामङ्गेन अद्य प्रातः जलप्रलयग्रस्तक्षेत्राणां निरीक्षणं कृतम् ।

ऋतुविज्ञान-विभागः

बिहारस्य उत्तर-पश्चिम-दक्षिण-पूर्व-क्षेत्रयोः भीषण-वृष्टिपातः अधुनापि प्रचलति । ऋतु-विज्ञान-विभागेन अद्य पश्चिम-चंपारण, रोहतास, औरंगाबाद, सुपौल, गया, बक्सर, मुजफ्फरपुर, अररिया,गोपालगंज-क्षेत्राणि समेत्य नवदश-जनपदेषु भीषण-वृष्टि-पातस्य सञ्चेतना प्रवर्तिता अस्ति । अस्मिन्नवधौ मेघ-गर्जनस्य विद्युत्पातस्य अपि सञ्चेतना प्रकाशिता अस्ति । नेपालस्य निम्नवर्ति-क्षेत्रेषु राज्ये च प्रवर्तमानेन निरन्तर-वृष्टिपातेन विविध-स्थानेषु नदीनां जलस्तरे वृद्धिः सञ्जाता। अस्माकं संवाददाता प्रोक्तवान् यत् पश्चिम-चम्पारण-जनपदे गण्डक-नद्याः जलस्तरं एकदा पुनः प्रवर्धितम् । अद्य प्रातः वाल्मीकी-गण्डक-बैराज इत्यस्मात् नद्याम् त्रयोविशति-सहस्राधिक-एकलक्ष-क्यूसेक-मिततः अधिकं जलं निपातितम् अस्ति । जनपद-प्रशासनेन अधिकारिणः कस्मादपि अप्रिय-स्थितेः सुरक्षायै सतर्कं भवितुं निर्दिष्टाः ।

केरलस्य उत्तर-भागेषु निरन्तरं वर्षा प्रवर्तते । तिरुवनंतपुरम-क्षेत्रे व्यापक-क्षतेः सूचना प्राप्ता । केरलस्य लक्षद्वीप-तटे मत्स्य-निग्रहणं प्रतिबंन्धितं सञ्जातम् अस्ति । वर्षा-कारणात् निम्नवर्ति-क्षेत्राणि जलमयानि जातानि येन कृषिक्षेत्रेषु

हानिः सञ्जाता । नेय्यर-क्षेत्रे जलस्तरं सम्वर्धितम् अस्ति । निरन्तरं वृष्टिम् उद्दिश्य तिरुवनंतपुरम-जनपदे सर्वाणि शैक्षणिक-संस्थानानि अद्य पिनद्धानि । तिरुवनंतपुरम-जनपदे अद्य श्वः च भविष्यमाणा पीएससी-परीक्षा स्थगिता जाता। कोट्टायम-क्षेत्रे जलप्लाव-प्रभावितानां जनपदानां विद्यालयेषु अवकाशः उद्धोषितः ।

## एशियाई-क्रीडास्पर्धा

चीनस्य हांगचोओ इत्यत्र नवदश-तमे एशियाई-क्रीडास्पर्धासु भारतेन अद्य यावत् अशीति-पदकानि विजितानि । अद्य लक्ष्यभेदन-स्पर्धायां ज्योति-सुरेखा-वेन्नम , ओजस-देवताले इत्यनयोः युगलेन कोरिया-दलस्य सो-चैवोन , जू-जाहून इत्यनयोः युगलः पराजित्य स्वर्ण-पदकम् अधिगतम् । लक्ष्यभेदन-स्पर्धायां भारतस्य इदं प्रथमं स्वर्णपदकम् अस्ति । सममेव पञ्चत्रिंशत्-किलोमीटर-मितस्य रेस-वॉक-मिक्स्ड-टीम इत्यस्यां स्पर्धायां रामबाबू-मंजूरानी इत्यनयोः युगलेन कांस्य-पदकं विजितम् ।

स्कवॉश इत्यस्याः मिक्स्ड-डबल्स-क्रीडायां अनाहत-सिंहः अभय-सिंहः इत्यनयोः युगलः उपान्त्यचक्रे मलेशियायाः आइफा-बिनती-अज़मान , मोहम्मद-सयाफिक-बिन-कमाल इत्यनयोः युगलेन पराजित्य कांस्यपदकेन सुन्तुष्टिम् अधिगतः। भारतीय-महिला-मुष्टा-मुष्टि-क्रीडिका परवीन-हुड्डा मुष्टा-मुष्टि-क्रीडायां उपान्त्यचक्रे चीनी ताइपे इत्यस्य लिन-यू-टिंग इत्यनया पराजित्य कांस्यपदकम् विजितवती ।

।। इति वार्ता: ।।